**राज्य शिक्षा केन्द्र म.प्र. भोपाल**

वार्षिक परीक्षा सत्र - 2023-24

विषय - संस्कृतम्

कक्षा - 6

पूर्णांक - 60

परीक्षा अवधि - 2.30 घण्टे

बहुविकल्पीयप्रश्ना: (प्रश्न 1 - 5)

निर्देश: - उचितविकल्पं चित्वा लिखत। (प्रत्येक- प्रश्नस्य कृते 1 अंक: निर्धारित: अस्ति )

प्रश्न - 1 के धावन्ति- 1

(A) कपोता: (B) चटका:

(C) अश्वा: (D) शुका:

प्रश्न - 2 धनवन्तरिपूजनं भवति - 1

(A) द्वादश्याम् (B) त्रयोदश्याम्

(C) चतुर्दश्याम् (D) अमावस्याम्

प्रश्न - 3 नरस्य आभरणम् अस्ति - 1

(A) रूपम् (B) गुण:

(C) ज्ञानम् (D) क्षमा

प्रश्न - 4 भगतसिंहादय: कस्मै प्राणार्पणम् अकुर्वन् - 1

(A) स्वतंत्रताये (B) परतन्त्राये

(C) परिश्रमाय (D) वनाय

प्रश्न - 5 'खादति' शब्दे धातु: अस्ति - 1

(A) खाद् (B) अति

(C) खादा (D) खद

**रिक्तस्थानानि (प्रश्न 5 - 10)**

**निर्देश: - उचितशब्दै: रिक्तस्थानानि पूरयत। (प्रत्येक- प्रश्नस्य कृते 1 अंक: निर्धारित: अस्ति)**

प्रश्न - 6 प्रियवाक्यप्रदानेन सर्वे .............................. जन्तव:। 1

प्रश्न - 7 .............................. वस्त्रनिर्माणं भवति। 1

प्रश्न - 8 "फल" इति शब्दस्य चतुर्थी विभक्ते: एकवचनं .............................. भवति। 1

प्रश्न - 9 रुचिकरा भाषा .............................. अस्ति। 1

प्रश्न - 10 बालक: विद्यालयं .............................. 1

अति- लघु- उत्तरीय-प्रश्नाः (प्रश्न 11 - 16)

निर्देशः – अधोलिखितप्रश्नानाम् एकपदेन उत्तरं लिखत । (प्रत्येक- प्रश्नस्य कृते 2 अंकः निर्धारितः अस्ति)

प्रश्न - 11 मोहनः सार्धसप्तवादने कुत्र गच्छति ?

प्रश्न - 12 धारानगर्याः नृपतिः कः आसीत् ?

प्रश्न - 13 गुरुनानकदेवः कस्मिन् प्रान्ते अभवत् ?

प्रश्न - 14 वस्तूनि केन शीतलानि भवन्ति ?

प्रश्न - 15 मूर्खाणां कालः कथं गच्छति ?

प्रश्न - 16 सन्धेः कति प्रकाराः भवन्ति ?

लघु-उत्तरीय- प्रश्नाः (प्रश्न 17 - 22)

निर्देशः - अधोलिखितप्रश्नानाम् एकवाक्येन उत्तरं लिखत । (प्रत्येक- प्रश्नस्य कृते 3 अंकः निर्धारितः अस्ति)

प्रश्न - 17 वृक्षः कैः शोभते ?

प्रश्न - 18 संस्कृतस्य पठने केषां रुचिः अस्ति ?

प्रश्न - 19 भारतीयाः कस्यै निरन्तरं प्रयासम् अकुर्वन् ?

प्रश्न - 20 निर्देशानुसारं उत्तरं लिखत -

(अ) "चलित्वा " इत्यस्मिन् पदे कः प्रत्ययः ?

(ब) "विद्यालयः" इति पदस्य सन्धिविच्छेदं कुरुत ।

(स) "वद" धातौः लट्लकारस्य प्रथमपुरुषस्य बहुवचनं लिखत ।

प्रश्न - 21 अधोलिखितसङ्ख्याः संस्कृतशब्देषु लिखत -

(अ) 10 (ब) 7 (स) 5

प्रश्न - 22 स्वपाठ्यपुस्तकात् एकं श्लोकं लिखत यः अस्मिन् प्रश्नपत्रे नास्ति

दीर्घ-उत्तरीय-प्रश्नाः (प्रश्न 23 - 26)

निर्देशः - अधोलिखितप्रश्नानां निर्देशानुसारम् उत्तरं लिखत । (प्रत्येक- प्रश्नस्य कृते 5 अंकः निर्धारितः अस्ति)

प्रश्न - 23 अधोलिखितपदैः पत्रं पूरयत- 5

(रोहितः, परिवारेण, करिष्यामि, विवाहसमारोहः, करेलीतः)

.........................

दिनांकः 3 फरवरी 2024

प्रिय मित्र यजुवेन्द्र!

सादर-नमोनमः

अत्यन्त हर्षस्य विषय अस्ति मम अग्रजस्य ---------------आगामीमासे भविष्यति। भवान् ..................सह निश्चयेन आगच्छन्तु। अहं प्रतिक्षां.................. पितरौ सादरं वन्दे।

भवद्ः मित्रम्

..............

प्रश्न - 24 अधोलिखितशब्दानां प्रयोगं कृत्वा चित्राधारेण पंच वाक्यानि संस्कृते लिखत - 5

(मण्डूकः, सरोवरः, अजः, गजः, वृक्षः)



प्रश्न - 25 अधोलिखितपद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृते लिखत- 5

विद्या ददाति विनयं, विनयाद् याति पात्रताम्।
पात्रत्वाद् धनमाप्नोति, धनाद् धर्मः ततः सुखम्॥

(अ) विद्या किं ददाति ?

(ब) कस्मात् पात्रतां याति ?

(स) धनाद् किम् ?

(द) पात्रत्वाद् किम् आप्नोति ?

(इ) 'ददाति' पदे कः लकारः ?

प्रश्न - 26 अधोलिखितगद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृते लिखत - 5

परेषाम् उपकारः परोपकारः। सूर्यः लोकहिताय तपति। नद्यः परोपकाराय वहन्ति। वृक्षाः परोपकाराय फलानि यच्छन्ति। मेघाः परोपकाराय जलं वर्षन्ति। वसुधा परोपकाराय भारं वहति एवं प्रकृतिः परोपकाराय प्रेरयति।

(अ) कः लोकहिताय तपति?

(ब) वृक्षाः किमर्थं फलानि यच्छन्ति ?

(स) के परोपकाराय जलं वर्षन्ति ?

(द) का परोपकाराय प्रेरयति ?

(इ) 'परोपकाराय' शब्दे का विभक्तिः ?

..........................................00..........................................